सूत उवाच ।
"स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे ।
भारते कृतपुण्यानां देवानामपि चालयम् ॥
मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः ।
योजनानां सहस्राणि चतुरशीतिः समुच्छ्रितः ॥
प्रविष्टः षोड़शाधस्तादरण्यां धरणीधरः ।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः ॥
तस्य शृङ्गत्रयं मूर्द्ध्नि स्वर्गो यत्र प्रतिष्ठितः ।
नानाद्रुमलताकीर्णं नानारत्नोपशोभितम् ॥
मध्यगं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि त्रीणि वै ।
प्रयुतोच्छ्रितमात्राणि द्वे शृङ्गे तस्य मध्यतः ॥
मध्यस्थं स्फाटिकं शृङ्गं वैदूर्य्यकरकामयम् ।
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम् ॥
योजनानां सहस्राणि नियुतानि चतुर्द्दश ।
उच्छ्रितं मध्यगं शृङ्गं स्वर्गो यत्र प्रतिष्ठितः ॥
प्रयुतान्तरितं शृङ्गं मूर्द्ध्नि च्छत्राकृति स्थितम् ।
पूर्व्वपश्चिमशृङ्गाणां सकलं मध्यमस्य च ॥
त्रिपिष्टपो नाकपृष्ठो ह्यमरःशान्तिनिर्व्वृती ।
आनन्दोऽथ प्रमोदश्च स्वर्गाः शृङ्गे च मध्यमे ॥
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ ।
आह्लादः स्वर्गराजश्च स्वर्गाः शृङ्गे तु पश्चिमे ॥
निर्म्मलो निरहङ्कारः सौभाग्यश्चातिनिर्म्मलः ।
सौख्यश्च निर्व्वृतिश्चैव पुण्याहश्च तथा द्विज ॥
स्वर्गाश्चैते द्विजश्रेष्ठ पूर्व्वशृङ्गे समर्थिताः ।
एकविंशति ये स्वर्गा निविष्टा मेरुमूर्द्धनि ॥
अहिंसादानकर्त्तारो यज्वानां तपसां तथा ।
तेषु तेषु वसन्ति स्म जनाः क्रोधविवर्जिताः ॥
जलप्रवेशी चानन्दं प्रमोदं वह्निसाहसः ।
भृगुप्रपाते सौख्यस्तु रणे चैवास्य निर्म्मलः ॥
अनशने तु सन्न्यासे मृतो गच्छेत्त्रिविष्टपम् ।
क्रतुयाजी नाकपृष्ठमग्निहोत्री च निर्व्वृतिम् ॥
तड़ागकूपकर्त्ता च लभते पौष्टिकं द्विज ।
सौवर्णदायी सौभाग्यं लभेत् स्वर्गं महातपाः ॥
शीतकाले महावह्निं प्रज्वालयति यो नरः ।
सर्व्वसत्त्वहितार्थाय स्वर्गं चाप्सरसं लभेत् ॥
हिरण्यगोप्रदानेन निरहङ्कारमवाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥
रौप्यदानेन शुद्धेन स्वर्गं गच्छति निर्म्मलम् ।
अश्वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
श्वेतन्तु लभते स्वर्गं यत्र गत्वा न शोचति ॥
कपिलागोप्रदानेन परार्द्धं चानुभूयते ।
गोवृषस्य प्रदानेन स्वर्गं मन्मथमश्नुते ॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्रोपानहदाता च स्वर्गं यात्युपशोभनम् ॥
देवायतनकर्त्ता वै शुश्रूषणपरस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
उपवासी त्रिरात्राद्यैः शान्तिस्वर्गं शुभं लभेत् ॥
सरित्स्नायी जितक्रोधी ब्रह्मचारी दृढ़व्रतः ।
निर्म्मलं स्वर्गमाप्नोति तथा भूतहिते रतः ॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ।
तत्तत् स्वर्गमवाप्नोति यद्यदिच्छति मानवः ॥
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति ।
स प्राप्य न निवर्त्तेत दिवं शान्तमनामयम् ॥
शृङ्गन्तु पश्चिमं यच्च ब्रह्मा तत्र स्थितः स्वयम् ।
पूर्व्वशृङ्गे स्वयं विष्णुर्मध्ये चैव शिवः स्थितः ॥*॥
अतः परन्तु विप्रेन्द्र स्वर्गाध्वानमिमं शृणु ॥
विमलं विपुलं शुद्धमुपर्य्युपरिसंस्थितम् ।
प्रथमे तु कुमारस्तु द्वितीये मातरः स्थिताः ॥
तृतीये सिद्धगन्धर्व्वाश्चतुर्थे विद्याधरा द्विज ।
पञ्चमे नागराजश्च षष्ठे तु विनतासुतः ॥
सप्तमे दिव्यपितरो धर्म्मराजस्तथाष्टमे ।
नवमे तु तथा दक्ष आदित्या दशमे पथि ॥*॥
भूर्लोकाच्छतसाहस्रमूर्द्ध्वं चरति भास्करः ।
योजनानां सहस्रे द्वे विष्कम्भेन समन्वितः ॥
त्रिगुणः परिणाहेन सूर्य्यविम्बप्रमाणतः ॥
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां तदस्तिष्ठति भास्करः ॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्करः ।
तदा संयमने याम्ये तदोद्यंस्तु प्रदृश्यते ॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येवं सविता सदा ।
ध्रुवाधाररथे तिष्ठन् वालिखिल्यादिभिः स्तुतः ॥
सूर्य्यमण्डलमानात्तु द्विगुणं सोममण्डलम् ।
पूर्णे शतसहस्रे तु तस्मान्नक्षत्रमण्डलम् ॥
द्विलक्षे तु बुधस्यापि स्थानं नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः ॥
अङ्गारकोऽपि शुक्रस्य तावन्माने व्यवस्थितः ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहितः ॥
शौरिर्वृहस्पतेश्चोर्द्ध्वं द्विलक्षे तु व्यवस्थितः ।
तस्मात् शनैश्चरादूर्द्ध्वं लक्षे सप्तर्षिमण्डलम् ॥
सप्तर्षिमण्डलादूर्द्ध्वमेकलक्षे ध्रुवः स्थितः ।
मेधीभूतः समस्तस्य ज्योतिश्चक्रस्य सत्तम ॥
भास्वांस्तपति विप्रेन्द्र ऊर्द्ध्वं किरणरश्मिभिः ।
कालसंख्यां त्रिलोकस्य स करोति युगे युगे ॥
जनस्तपस्तथा सत्यमेताल्लोकान् द्विजाश्रया ।
ब्रह्मणो मुनिशार्दूल विष्णुशक्तिविदीपितः ॥
ऊर्द्ध्वं गतैर्द्विजश्रेष्ठ रश्मिभिस्तपते रविः ।
अधोगतैस्तु भूर्लोकं द्योतते दीप्तदीधितिः ॥
तमःपापहरः सूर्य्यः कर्त्ता त्रिभुवनस्य च ।
छत्रवत् परिदृश्येत मण्डलामण्डलं चरन् ॥
द्विगुणेन च विस्तीर्णं भूतलात्तत् प्रतिष्ठितम् ।
आदित्यमण्डलाधस्तात् भुवो लोकः प्रतिष्ठितः ॥
तदधस्तात्तु विप्रेन्द्र भूर्लोकः संप्रतिष्ठितः ।
एवमेतत्त्रिभुवनं विष्णुकाये व्यवस्थितम् ॥
त्रैलोक्यस्येश्वरत्वञ्च विष्णुदत्तं शतक्रतोः ।
लोकपालैश्च सहितो लोकान् रक्षति धर्म्मतः ।
वसन् स्वर्गे महाभाग देवेन्द्रः स तु कीर्त्तितः ॥
अतोऽधस्ताद्द्विजश्रेष्ठ पातालन्तु स्वयंप्रभम् ।
न तत्र तपते सूर्य्यो न रात्रिर्न निशाकरः ॥
दिव्यं रूपं समास्थाय तपन्ते सततं जनाः ।
पातालस्थाः द्विजश्रेष्ठ दीप्यमानाः स्वतेजसा ॥
स्वर्लोकात्तु महर्लोकः कोटिमाने व्यवस्थितः ।
ततो योजनमानेन द्विगुणो मण्डलेन तु ॥
जनलोकस्थितो विप्र पञ्चमो मुनिसेवितः ।
तस्योपरि तपोलोकश्चतुर्भिः कोटिभिः स्मृतः ॥
सत्यलोकोऽष्टकोटीभिः सर्व्वेषामुपरिस्थितः ।
सर्व्वे छत्राकृतिर्ज्ञेया भुवना भुवनोपरि ॥
ब्रह्मलोकाद्विष्णुलोको द्विगुणेन व्यवस्थितः ।
वाराहे तस्य माहात्म्यं कथितं लोकचिन्तकैः ॥
ततः परं द्विजश्रेष्ठ ततो ह्यण्डकपालकम् ।
ब्रह्माण्डात् परतः साक्षात् निर्लेपः पुरुषः स्थितः ॥
यमुपास्य विमुच्येत तपोज्ञानसमन्विताः ।
इति ते संस्थितिः प्रोक्ता भूगोलस्य मयानघ ॥
यस्तु सम्यगिमां वेत्ति स याति परमां गतिम् ।"
इति नृसिंहपुराणे ३० अध्यायः ॥

पारिभाषिकस्वर्गो यथा,—
"मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्म्मणः ॥"
इति गारुड़े । १०८ । ४४ ॥

न्यायमते स्वर्गलक्षणं यथा । दुःखासम्भिन्नत्वादिविशिष्टसुखत्वं स्वर्गत्वं तदेव स्वर्गपदशक्यतावच्छेदकमिति सिद्धान्तः । आदिपदेन अनन्तरदुःखग्रस्तभिन्नत्वाभिलाषोपनीतत्वयोः परिग्रहः । अतएव ।
"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदम् ॥"
इति स्वरादिपदशक्तिग्राहकार्थवादोऽपि संगच्छते । इति गदाधरभट्टाचार्य्यकृतवादार्थः ॥*॥
किञ्च ।
"मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्य्ययः ।
नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तमाः ॥"
इति ब्रह्मपुराणे १८ अध्यायः ॥

स्वर्गगामी, [न्] त्रि, (स्वर्गं गच्छतीति । गम + णिनिः ।) स्वर्गगमनकर्त्ता । यथा,—
"सर्व्वहर्त्ता विहिंसा ये ये च सर्व्वसहा नराः ।
सर्व्वस्य प्रियभूताश्च ते नराः स्वर्गगामिनः ॥"
इति कर्म्मलोचनः ॥

स्वर्गङ्गा, स्त्री, (स्वर्गस्य गङ्गा ।) मन्दाकिनी । इति शब्दरत्नावली ॥

स्वर्गजित्, त्रि,(स्वर्गं जयतीति । जि + क्विप् तुगागमश्च ।) स्वर्गजेता । (यथा, महाभारते । १२ । ७५ । ३४ ।
"यस्मिन् भयार्द्दितः सम्यक् क्षेमं विन्दत्यपिक्षणम् ।
स स्वर्गजित्तमोऽस्माकं सत्यमेतत् ब्रवीमि ते ॥")

स्वर्गपतिः, पुं, (स्वर्गस्य पतिः ।) इन्द्रः । इति हेमचन्द्रः ॥

स्वर्गवधूः, स्त्री, (स्वर्गस्य स्वर्गस्थितलोकस्य वधूः ।) अप्सरसः । इति हेमचन्द्रः ॥

स्वर्गलोकेशः, पुं, (स्वर्गलोकाय ईशः । शरीरजन्यकर्म्मणकृते स्वर्गप्राप्त्यभावात्तथात्वमस्य ।) शरीरम् । इति जटाधरः ॥ (स्वर्गलोकस्य ईशः ।) इन्द्रश्च ॥